| | | |
|---|---|---|
| Singing, song 2. | [1]गीतं [2]गानमिति प्रोक्तं [1]वाद्यमा[2]तोद्यमिष्यते[a] । | A musical instrument 2. |
| Dancing 3. | [1]नृत्यं तु [2]ताण्डवं [3]लास्यं त्रितयं नाट्यमुच्यते ॥ १३ ॥ | |
| Measure, musical time 2. | [1]ताल: [b]काल[2]क्रियामानं [1]लय: [2]साम्यमुदाहृतम् । | Equal time of music and dancing 2. |
| Gesticulation 2 | [1]अङ्गहारो[2]ऽङ्गविक्षेप: सूच्योऽर्थोऽभिनय: स्मृत: ॥ १४ ॥ | |
| | प्रेक्षार्थं गीतवाद्यं तु सङ्गीतमभिधीयते । | |
| | आदावेव तु यन्नाट्यं [1]पूर्वरङ्ग: स उच्यते ॥ १५ ॥ | Prelude to drama. |
| A flute. | प्रोक्ता [1]घोषवती [2]वीणा [3]विपञ्ची [4]परिवादिनी । | |
| | [5]वल्लकी चेति तद्भेदास्तन्त्रीभेदसमुद्भवा: ॥ १६ ॥ | |
| A stage, a dancing place 2. | [1]रङ्ग: [2]स्यान्नर्तनस्थानं [1]मृदङ्गो [2]मुरज: स्मृत: । | A small drum 2. |
| A drum 4. | [1]आनक: [2]पटहो ज्ञेयो [3]डिण्डिम: [4]पणवस्तथा ॥ १७ ॥ | |
| The bow of a lute, a drum stick 2. | [1]कोणो [2]वादनदण्ड: [1]स्याद्भेरी [2]दुन्दुभिरिष्यते । | A large kettle-drum. |
| The queen 2. | नाट्ये [1]राज्ञी स्मृता [2]देवी [1]कुमारो [2]भर्तृदारक:[c] ॥ १८ ॥ | The heir-apparent, the prince. |
| A learned man. | [1]भाव इत्युच्यते [2]विद्वान् [1]भावुको [2]भगिनीपति: । | Sister's husband 2. |
| A father 2. | [1]आवुकस्तु [2]पिता ज्ञेय [1]आर्यो [2]मारिष उच्यते ॥ १९ ॥ | A venerable person. |
| | d × × × × × × × × | |

a मुच्यते b काल: क्रियामानं c भद्रदारक:, भट्टदारक

d× श्रीरागो वसन्तस्य पञ्चमो भैरवस्तथा ।
मेघरागस्तु विज्ञेयो षष्ठो नटनरायण: ॥ १ ॥
गौडी कोलाहलां धारी द्रविडी मालवकौशिका ।
षष्टीस्याद्देवगान्धारां श्रीरागा च विनिर्मिता ॥ २ ॥
आदोला कौशिकी चैव तथा पटममञ्जरी ।
गुडकुरी चैव देशाख्या रामकरी वसन्तजा ॥ ३ ॥
त्रिगुणा स्तम्भतीर्थी च आभेरी ककुभा तथा ।
वियराडी तथा चेरी षडेता: पञ्चमे मता: ॥ ४ ॥
भैरवी गूर्जरी चैव भाषा वेलाउली तथा ।
कर्णाटी रक्तहंसा च षडेता: भैरवे मता: ॥ ५ ॥
वङ्गुला मथुरा चैव कामोदा चोषसाटिका ।
देवगिरी च देवाला षडेता: मेघरामजा: ॥ ६ ॥
त्रोटकी मोटकी चैव 'दुंविनिट्ट विराटिका ।
मल्लारी सैंधवी चैव एता नटनरायणे ॥ ७ ॥